दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता
■ पृष्ठ-09 ■ वर्ष-5 ■ अङ्क-339
1
सितम्बर 28, 2026
Website- www.himsanskritam.com
Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ शरद्-ऋतुः
सूर्यः दक्षिणायनम् आश्विन् कृष्णद्वितीया
आश्विन् 12 प्रविष्टांशः मङ्गलमयः भवेत्

2 गुजरातस्य साबरमती-क्षेत्रे पञ्चदश-शत-कोटि-रूप्यकाणां रेल-विकास-परियोजनाः गृह-मन्त्रिणा अमित शाहेन समुद्घाटिताः
4 हिमाचलस्य मण्ड्यां सम्पन्नः श्रीसत्यसाई-सेवा-सङ्घटनस्य ऐतिहासिकः 'देवसमागमः'
8 भागलपुर- भारतीय-सूचनाप्रौद्योगिकी- संस्थानस्य दीक्षान्तसमारोहः सम्पन्नः,२६२ छात्रेभ्यः उपाधयः, पञ्चभ्यः स्वर्णपदकानि

## मनोगतम्- शल्य प्रहारः, सिन्दूराभियानं च भारतस्य नूतनायाः उग्रवाद-विरोधी-नीतेः अमोघम् उदाहरणम् - प्रधानमन्त्री

आकाशवाण्याः 'मनोगतम्' इति कार्यक्रमस्य सम्बोधनक्रमे राष्ट्रम् उद्बोधयता प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रतिपादितम् यत् भारतीय-सैन्यबलेन पाकिस्ताने आतङ्कवादिनां निगूढ आश्रयेषु कृतः सर्जिकल स्ट्राइक इति'शल्य-प्रहारः' भारतस्य आतङ्कवाद-विरोधि-नीतेः नव्यम् उदाहरणं जगतः पुरतः उपस्थापयति । प्रधानमन्त्रिणा निगदितम् यत् भारतवर्षम् अस्य ऐतिहासिक-शल्य-प्रहारस्य दशम-वर्षपूर्तिमभिनन्दिष्यति। नियन्त्रण-रेखां लङ्घित्वा वीर-भारतीय-सैनिकाः येन शौर्येण आतङ्कवाद-विरुद्ध कठोराम् प्रतिक्रियाम् अकुर्वन्, तत् वीक्ष्य समग्रं विश्वम् आश्चर्यचकितम् अभवत्। सः सबलम् अवदत् यत् एषः शल्य-प्रहारः दीर्घकालात् आतङ्कवादी-आक्रमणैः सन्तप्तस्य राष्ट्रस्य एकः निर्णायकः प्रत्युत्तरप्रहारः आसीत्। विगते दशके 'बालाकोट-वैमानिक-प्रहारात्' आरभ्य 'सिन्दूराभियानं यावत् भारतेन मुहुर्मुहुः एषः स्पष्टः सन्देशः प्रसारितः यत् आतङ्कवादी-दुश्चेष्टानां प्रत्युत्तरं यथोचित-दण्डेन एव दीयते । सः उदघोषयत् यत् 'वर्ल्ड-ट्रेड-सेन्टर' स्थानके हतेषु बलिदानेषु अमरीकी-नागरिकान् विहाय सर्वाधिकं सङ्ख्या भारतीय नागरिकाणाम् आसीत्। चतुर्दशोत्तरद्विसहस्रतमे वर्षे प्रधानमन्त्री पदभारग्रहणात् परम् अमेरिका-यात्रावधौ तेभ्यः निरपराध-नागरिकेभ्यः स्वकीयं श्रद्धाञ्जलिं समर्पितवान् इति सः अस्मरत् । प्रधानमन्त्री कोटिशः भारतीय-नागरिकाणां पक्षतः शोकसन्तप्त परिवारेभ्यः पुनः एकदा संवेदनां प्राकटयत्।

## सर्वेषु राज्येषु केन्द्रशासित-प्रदेशेषु च जनगणनाभियानस्य प्रथम-चरणं पूर्णताम् अगात् - प्रधानमन्त्री

जनगणना-प्रक्रियाम् अधिकृत्य श्रीमोदी अवदत् यत् अस्य राष्ट्रीय-अभियानस्य प्रथमः चरणः देशस्य सर्वेषु राज्येषु केन्द्रशासित प्रदेशेषु च प्रायः सम्पन्नः अभवत्, यत्राधुना यावत् द्वात्रिंशत् कोट्यधिक-परिवाराणाम् विवरणं समालेखितम्। सम्प्रति लद्दाख-हिमाचलप्रदेश-जम्मूकाश्मीर-उत्तराखण्ड-राज्यानां दुर्गमेषु हिमाच्छादितेषु क्षेत्रेषु अपि कार्यमिदम् अविरतं प्रचलति । एतेभ्यः सीमान्त-क्षेत्रेभ्यः अनेके प्रेरकाः अनुभवाः प्राप्ताः इति उल्लेखयन् प्रधानमन्त्री अवदत् यत् उत्तराखण्ड-राज्ये देशस्य 'प्रथम-ग्रामरूपेण' प्रसिद्धात् चमोली-मण्डलस्य माणा-ग्रामतः मतगणना-कार्यस्य शुभोत्कर्षः अभवत्। अद्य विश्व-हिन्दू-परिषदः भूतपूर्वस्य अन्ताराष्ट्रिय-कार्याध्यक्षस्य श्रद्धेयस्य स्व. अशोक-सिङ्घलस्य जन्म शताब्दी-जयन्ती वर्तते इति प्रधानमन्त्रिणा प्रोक्तम् ।




सः अशोक-सिङ्घलम् एतादृशं महान्तं व्यक्तित्वम् अभिहितवान्, येन स्वकीयम् अखिलं जीवनम् संस्कृतेः, समाजस्य, राष्ट्रस्य च सेवायै समर्पितम्। प्रधानमन्त्रिणा अक्टूबर-मासस्य द्वितीये दिनाङ्के आयोज्यमानायाः महात्मा-गान्धि-जयन्त्याः सन्दर्भ अभिहितम् यत् बापू-इत्यस्य जीवन-मूल्येषु स्वच्छता-अभियानस्य स्थानम् अनन्यम् अस्ति। सः न्यगादीत् यत् व्यक्तिगत स्तरात् आरब्धाः प्रयासाः अनन्तरं 'लोक-सहभागेन' व्यापकरूपं धारयन्ति । स्वच्छतैव राष्ट्रस्य पक्षतः महात्मा गान्धिने दीयमानः सर्वोत्कृष्टः श्रद्धाञ्जलिः वर्तते इति श्रीमोदिना सबलम् उक्तम्।

### 'मादक-मुक्त-युवा-अभियानम्'

मादक-द्रव्य-व्यसन-मुक्त्यै सञ्चालितस्य 'मादक-मुक्त-युवा-अभियानस्य' प्रसङ्गे प्रधानमन्त्रिणा प्रतिपादितम् यत् लक्षाधिकैः युवकैः दुर्व्यसनात् दूरस्थाने सम्भूय अन्यान् जागरयितुं महती प्रतिज्ञा गृहीता। शत-सप्ताह-व्यापि-अस्मिन् राष्ट्रिय-यज्ञे युवकाः स्वकीयाम् अभिव्यक्ति-कलाम् प्रयुञ्जीरन् इति श्रीमोदिना आह्वानं विहितम्। क्रीडा-संवर्धनमधिकृत्य तेन प्रोक्तम् यत् रक्त-दुर्गस्य प्राचीरात् उद्घोषितायाः 'क्रीडा-प्रतिभा-अन्वेषण-योजनायाः' मूल-लक्ष्यम् सुदूर-ग्रामेषु निगूढ-सामर्थ्यस्य अन्वेषणम् अस्ति, येन वैश्विक स्पर्धासु देशस्य वर्चस्वं निरन्तरं भवेत् । सः अवोचत् यत् सम्पूर्णः सितम्बर-मासः कुपोषण-उन्मूलनाय 'पोषण-मासरूपेण' आचर्यते, यत्र समाजस्य विविधाः वर्गाः एकीभूय अस्य कार्यस्य कृते नूतनान् उपक्रमान् प्रारब्धवन्तः ।

## अद्यतनीयं सुभाषितम्

**लोभः सदा विचिन्त्यो लब्धेभ्यः सर्वतो भयं दृष्टम्।**
**कार्यऽकार्यविचारो लोभविमूढस्य नाऽस्त्येव।।**

भावार्थः- मनुष्य में लोभ की प्रवृत्ति का होना सदैव चिन्ता का कारण है और यदि कोई व्यक्ति ऐसा हो तो उसके चारों ओर भय का वातावरण बन जाता है क्योंकि लोभ के वशीभूत होकर ऐसे व्यक्ति की अच्छे और बुरे कार्यों के बीच विचार करने की क्षमता समाप्त हो जाती है।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा




## ६५तमे राष्ट्रियकलाप्रदर्शने विंशतेः ललितकलाकादमी-पुरस्काराणां घोषणा

ललितकलाकादम्या ६५तमे राष्ट्रियकलाप्रदर्शने विंशतेः (२०) ललितकलाकादमी-पुरस्काराणां घोषणा कृता। राष्ट्रियकलाकादमीरूपेण ललितकलाकादमी अस्य प्रदर्शनस्य आयोजनं कुर्वती अस्ति। एतत् भारते समकालीन-दृश्य-कलायाः प्रतिष्ठितासु वार्षिक-प्रदर्शनीषु अन्यतमा मन्यते। संस्कृति-मन्त्रालयस्य अनुसारम् अकादम्यै सप्तविंशतेः (२७) राज्येभ्यः केन्द्रशासितप्रदेशेभ्यश्च द्विसहस्राधिकेभ्यः कलाकारेभ्यः प्रायः षट्सहस्रं कलाकृतयः प्राप्ताः। पुरस्कारप्राप्तृषु कलाकारेषु मूर्तिकलायां चन्द्रशेखरसाईं, चित्रकलायां चन्द्रनस्करः, रेखाङ्कने गोपालः, मुद्रणकलायां (प्रिंटमेकिंग) च पङ्कजकुमारशर्मा तथा प्रीतममधुकरदेउसकरः सम्मिलिताः सन्ति।



# गुजरातस्य साबरमती-क्षेत्रे पञ्चदश-शत-कोटि-रूप्यकाणां रेल-विकास-परियोजनाः गृह-मन्त्रिणा अमित शाहेन समुद्घाटिताः

केन्द्रीय-गृह-मन्त्री अमितशाहः साबरमती-स्थाने पञ्चदशशत कोट्याधिक-रूप्यकाणां रेल-परियोजनानां लोकार्पणं शिलान्यासं च अकरोत्। तेन गुजरातस्य मुख्यमन्त्रिणा सह देशस्य प्रथमा एल.एन.जी.-चालिता रेल-सेवा च आरब्धा। एषा द्वि-इन्धन-प्रणाली चत्वारिंशत् प्रतिशतं यावत् डीजल उपभोगं न्यूनीकरिष्यति, या भारतस्य हरित-परिवहन-लक्ष्याय महती उपलब्धिः अस्ति। जनसभां सम्बोधयन् गृह-मन्त्री 'कवच-सुरक्षा-प्रणाल्याः तथा मालवाहक गलियारा-परियोजनानां उल्लेखं कुर्वन् विगत-द्वादश-वर्षेषु रेल-क्षेत्रस्य विषयं प्राकाशयत्।

# सामरिक-स्वायत्ततायाः सुरक्षायाः च उपरि आघाते सति भारतं स्वात्मरक्षां विधास्यति एव- रक्षामन्त्री

भारतवर्ष कस्यापि राष्ट्रस्य भूखण्डम् आक्रमयितुं न वाञ्छति, परञ्च राष्ट्रिय-सुरक्षायाः स्वायत्ततायाश्च उल्लङ्घने सति प्रतिघातं निष्प्रचं करिष्यति इति नवदेहल्यां रक्षा-सम्मेलने भाषमाणः रक्षा-मन्त्री राजनाथसिंहः प्रतिपादितवान्। तेन स्पष्टीकृतम् यत् आतङ्कवाद-पोषकैः सह वार्तायाः कोऽपि विकल्पः नास्ति । सः अवदत् यत् राष्ट्र-सुरक्षा केवलम् सैन्यबलानां न, प्रत्युत सर्वेषामपि नागरिकाणां सामूहिकं उत्तरदायित्वम् अस्ति। रक्षा-उत्पादन-क्षेत्रे 'आत्मनिर्भरतायाः' उल्लेखं कुर्वन् रक्षा-मन्त्रिणा निगदितम् यत् अस्यां दिशि भारतेन महती उपलब्धिः अर्जिता।

# भारत-वेस्टइंडीज-दलयोः मध्ये एकदिवसीय- शृङ्खला अद्य आरभ्यते प्रथमस्पर्धा अनन्तपुर्याम् रोहित-विराटौ क्रीडिष्यतः

**हिमसंस्कृतवार्ताः- अनन्तपुरी**

संवत्सरैकस्य दूरे आगामिन्यै विश्वचषक- क्रिकेट-क्रीडायै भारतगणस्य सज्जतारूपेण वेस्टिन्डीसम् विरुध्य एकदिवसीय-शृङ्खला रविवासरे अपराह्ने आरभ्यते। अनन्तपुर्यां ग्रीन-फील्ड-क्रीडाङ्गणे क्रीडा। क्रीडात्रयोपेत-शृङ्खला अस्ति। वरिष्ठक्रीडकौ रोहितशर्मा, विराटकोहली च सप्तविंशत्युत्तरद्विसहस्रतमे वर्षे विश्वचषकानन्तरं निवर्त्स्यतः इत्यभ्यूहात् अनन्तपुर्याम् तयोः अन्तिमक्रीडा इति गण्यते। शुभमानगिलः दलनायकः अस्ति।







# नागोया-एशियाई-क्रीडासु स्क्वैश-स्पर्धायाम् अभय सिंहेन अनाहत-सिंहेन च रजत-पदके विजिते, महिलानां द्विशत मी. धावने च हरिताभद्रा कांस्य पदकं विजितवती





जापान-देशस्य 'आइची-नागोया' मण्डले प्रवर्तमाने 'एशियायी-क्रीडामहोत्सवे' स्क्वैश स्पर्धायाम्' अभयसिंह-अनाहतसिंहाभ्यां यथाक्रमं पुरुष-महिला-एकल-वर्गयोः वे रजत पदके स्वायत्तीकृते । एतदतिरिच्य महिलानाम् द्विशत-मीटर्-धावन-प्रतियोगितायां हरिता-भद्रा तृतीयं स्थानं प्राप्य कांस्यपदकम् अलभत । सम्प्रति भारतवर्षम् चतुः स्वर्ण-चतुर्दश रजत- पञ्चदश कांस्य पदकैः सह आहत्य त्रयस्त्रिंशत् पदकानि सम्प्राप्य पदक तालिकायाम् एकादशं स्थानं भजते

# विष्णुपदक्षेत्रे समापतितः जनौघः, जनपदाधिकारी त्रिहोरापर्यन्तं पादचारेण व्यवस्थाः समीक्षितवान्

**हिमसंस्कृतवार्ताः राघव नाथ झा, गया**

पितृपक्षमहामेलायाः द्वितीयेऽहनि भानुवासरे विष्णुपदमन्दिरपरिसरे पिण्डदानाय तर्पणविधये च भक्तानां महाजनौघः समापतितः। देशस्य विविधाभ्यः दिग्भ्यः समागताः सहस्रशः तीर्थयात्रिणः विष्णुपदमन्दिरं फल्गुतटघट्टान् च संप्राप्ताः। वर्धमानं जनसम्मर्दं दृष्ट्वा जनपदाधिकारी शशाङ्क-शुभङ्करः स्वयमेव प्रायः त्रिहोरापर्यन्तं विष्णुपदक्षेत्रे पादचारेण परिभ्रम्य मेलाव्यवस्थानां प्रत्यक्षं निरीक्षणम् अकरोत्। जनपदाधिकारिणा मन्दिरप्राङ्गणे, तीर्थघट्टेषु, प्रमुखावागमनमार्गेषु च श्रेणीव्यवस्था, सम्मर्दसन्नियमनम्, स्वच्छता, तीर्थयात्रिणां गतागतं च सविस्तरं समीक्षितम्। बहुषु स्थलेषु सः स्वयमेव भक्तवृन्दस्य मध्ये प्रविश्य श्रेणीः सुव्यवस्थिताः कारयन् अधिकारिभ्यः अत्यावश्यकान् निदेशान् प्रददौ। सः स्पष्टतया निर्दिष्टवान् यत् कस्यामपि दशायां जनसम्मर्दः सङ्कटापन्नः अनियन्त्रितो वा न स्यात्, प्रत्येस्मै यात्रिकाय क्षेमपूर्णं सुगमं च दर्शनं पिण्डदानसौकर्यं च सुलभं भवेत्। राष्ट्रिय-छात्र-सेनायाः पथदर्शक- संस्थायाश्च सेवाभावस्य श्लाघानिरीक्षणकाले जनपदाधिकारिणा राष्ट्रिय-छात्रसेनायाः पथदर्शक- संस्थायाश्च छात्रवृन्दस्य सेवाभावना सश्रद्धं श्लाघिता। एते छात्राः निरन्तरं भक्तान् श्रेणीबद्धान् विधातुम्, दिङ्निर्देशं कर्तुम्, विशेषतश्च वृद्धान् नारीश्च समुद्धर्तुं साहाय्याचरणे व्यापृताः आसन्। सः छात्रान् एतादृशेनैव कठोरानुशासनेन कर्तव्यनिष्ठया च सेवाकार्यं सततं निर्वोढुम् आहूतवान्।

**चक्रासनैः वृद्धतीर्थयात्रिकेभ्यः महती विश्रान्तिः**

मेलाक्षेत्रे स्वयंसेविभिः युवोन्मेषैः वृद्धाः, विकलाङ्गाः, निराश्रयाश्च यात्रिणः चक्रासनसाहाय्येन घट्टान् देवायतनं च प्राप्यन्ते। जनपदाधिकारी एतत् मानवीयोपक्रमं भूयो भूयः अभिनन्द्य अवदत् यत् पितृपक्षः न केवलं धार्मिकानुष्ठानमात्रम्, अपि तु परोपकारस्य सहभावस्य च संस्कृतेः महापर्व विद्यते।

**स्वच्छतायै विशेषः आग्रहः**

जनपदाधिकारिणा नगरनिगमायुक्ताय विष्णुपदपरिसरे, नदीघट्टेषु, सर्वेषु सञ्चारमार्गेषु च सततं स्वच्छतां प्रमाणीकर्तुं समादिष्टम्। सः न्यवेदयत् यत् कुत्रापि अवकरराशिः सञ्चितो न भवेत्, स्वच्छताकर्मिणां च पर्याप्तनियोजनं तिष्ठेत्। नगरनिगमस्य स्वच्छताकर्मिणां कर्मतत्परताम् अपि सः भृशं प्रशंसितवान्।

**रक्षणं सौविध्यं च परा प्राथमिकता**

जनपदाधिकारिणा सर्वान् अधिकारिणः, आरक्षकबलानि, स्वयंसेविसङ्घटनानि, कर्मचारिणश्च प्रति आदिष्टं यत् पितृपक्षमेलायाम् आगतानां तीर्थयात्रिणां योगक्षेमं सौविध्यं च प्रशासनस्य सर्वोच्चं प्राधान्यं भवेत्। देश-देशान्तरात् समागताय प्रत्येस्मै तीर्थयात्रिकाय रक्षिता, निर्मला, सुसंस्कृता च व्यवस्था प्रदातव्येति प्रशासनस्य चरमलक्ष्यम् अस्ति।

# हिमाचले कन्यानां भविष्यस्य सुदृढः आधारः; २१,१०० रूप्यकाणां सावधिनिक्षेपः, अध्ययनाय च १२ सहस्र-रूप्यकाणि




**हिमसंस्कृतवार्ताः- शिमला।**
हिमाचलप्रदेशस्य मुख्यमन्त्री सुखविन्दर-सिंहसुक्खू- महोदयः अवदत् यत् प्रदेशसर्वकारः कन्यानां शिक्षां, तासां समुज्ज्वलं भविष्यम्, स्वावलम्बनं च प्रति गम्भीरतया कार्यं कुर्वन्नस्ति। सर्वकारस्य दृढः सङ्कल्पः यत् कस्या अपि कन्यायाः दुर्बला आर्थिकस्थितिः तस्याः विद्याभ्यासस्य स्वप्नानां च मध्ये अन्तरायः (बाधा) न भवेत्। एतम् एव उद्देश्यं सम्मुखीकृत्य सर्वकारेण 'बेटी है अनमोल' इति योजनायाः माध्यमेन आर्थिकदृष्ट्या दुर्बल- कुटुम्बानां कन्याभ्यः वित्तीय-साहाय्यं प्रदीयते।
मुख्यमन्त्रिणा स्पष्टीकृतं यत् अस्याः योजनायाः अन्तर्गतं १२ अगस्त २०२१ दिनाङ्कात् परं जातानां निर्धन-सीमा-रेखा-अधः स्थितानां परिवाराणां कन्यानां कृते एकविंशति-सहस्र-शत-रूप्यकाणां (२१,१०० रूप्यकाणाम्) सावधि-निक्षेपस्य प्रावधानं कृतम् अस्ति। कन्यायाः अष्टादश-वर्ष-वयसः (१८ वर्षाणाम्) सम्पूर्तौ इयं राशिः तां प्रति स-वृद्धिकं प्राप्स्यते। अनेन भविष्ये उच्चशिक्षायै, कौशल-विकासाय, अन्यासां वा आवश्यकतानां पूर्तये कन्याभ्यः दृढः आर्थिक-आधारः समुपलब्धः भविष्यति।

### अध्ययनाय द्वादश-सहस्र-रूप्यकाणां (१२,०००) साहाय्यं छात्रवृत्तयश्च

मुख्यमन्त्रिणा विज्ञापितं यत् योजनायामस्यां कन्यानां निरन्तरशिक्षायै द्वादश- सहस्र-रूप्यकाणां (१२,०००) एकत्रित-वित्तीय-साहाय्यस्य अपि व्यवस्था वर्तते। अनेन सहैव शिक्षायाः विविधस्तरेषु प्रतिवर्षं वार्षिक-छात्रवृत्तीनां वितरणम् अपि विधीयते, येन बालिकानाम् अध्ययनं निरन्तरं प्रोत्साह्येत।
मुख्यमन्त्रिणः अनुसारं राज्ये अद्यावधि पञ्चसप्तति-सहस्र-नवाधिकचतुःशतं (७५,४०९) कन्याः 'बेटी है अनमोल' योजनायाः लाभं लब्धवत्यः सन्ति। एषा विपुला सङ्ख्या प्रमाणयति यत् सर्वकारः निर्धन-परिवाराणां कन्यानां संरक्षणाय, शिक्षायै, स्वावलम्बनाय च कृतसङ्कल्पः अस्ति।

### १८ वर्ष-वयसि सवृद्धिकं लप्स्यते सावधिधनम्

मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खू-महोदयेन प्रोक्तं यत् बह्वीषु परिस्थितौ धनाभावेन बालिकानाम् अध्ययनम् अवरुध्यते। एतादृश्याम् अवस्थायां सर्वकारस्य साहाय्येन ताः स्वावलम्बिनीः भवितुं शक्नुवन्ति। कन्यायाः शिक्षा केवलं तस्याः वैयक्तिक-विकासाय एव न, अपि तु समग्रेण कुटुम्बेन समाजेन च सह राज्यस्य विकासाय अपि सुमहत् योगदानं ददाति। अतः बालिकानां सशक्तीकरणाय उज्ज्वलभविष्याय च सर्वकारपक्षतः भविष्येऽपि एतादृशाः लोक-कल्याणकाराः उपायाः निरन्तरं प्रवर्तिष्यन्ते।

# मन्त्रिपद-प्रदानस्य पक्षस्योपरि जयरामस्य सुक्खूमहोदयं प्रति वाक्प्रहारः; अवदत्- 'उच्चनेतृत्वस्य समक्षं किमर्थं मौनं धारयति मुख्यमन्त्री'



**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशस्य भूतपूर्व-मुख्यमन्त्री, विपक्षस्य नेता जयरामठाकुर-महोदयः मन्त्रिमण्डल- विस्तारविषयम् आदाय मुख्यमन्त्रिणं सुखविन्दरसिंहसुक्खू- महोदयं तीक्ष्णतया लक्ष्यीकृतवान्। तेन आरोपः विहितः यत् मुख्यमन्त्री मार्गात् आरभ्य विधानसभां यावत् स्वपक्षस्य विधायकेभ्यः मन्त्रिपदवितरणस्य पक्षान् करोति, किन्तु यदा एतेषां पक्षाणां काङ्ग्रेस-दलस्य उच्चनेतृत्वस्य पुरतः क्रियान्वयनस्य वेला समायाति, तदा सः साकल्येन तूष्णीं (मौनं) तिष्ठति। जयरामठाकुरेण उल्लिखितं यत् मुख्यमन्त्रिणा विधानसभायाः अन्तः एकस्य विधायकस्य मन्त्रिपदे नियोजनस्य घोषणा विहिता आसीत्; तदनन्तरं जनसभायामपि एतादृशं कथितम्, किन्तु प्रायः एक-वर्षे व्यतीतेऽपि अस्याः घोषणायाः कोऽपि परिणामः प्रत्यक्षं नायातः।

### 'काङ्ग्रेस-प्रभारिणी कथयति- नैव आगतः कोऽपि प्रस्तावः'

विपक्षस्य नेत्रा प्रोक्तं यत् मुख्यमन्त्रिणः कार्यशैल्याः उपरि अधुना तस्यैव दलस्य हिमाचल- प्रभारिण्याः वक्तव्येन गम्भीराः संशयाः उत्थिताः सन्ति। तदनुसारं, काङ्ग्रेसदलस्य हिमाचल-प्रभारिण्या सञ्चारमाध्यमानां पुरतः स्पष्टीकृतं यत् राज्ये मन्त्रिमण्डल-विस्तारस्य कोऽपि प्रस्तावः तस्याः पार्श्वे नागतः। जयरामठाकुरः प्रश्नम् अकरोत् यत् यदि मुख्यमन्त्री विधानसभायां जनसभासु च मन्त्रिपद-वितरणस्य चर्चां करोति, तर्हि दलस्य उच्चनेतृत्वस्य पार्श्वे प्रस्तावः किमर्थं न प्रेष्यते? अनेन मुख्यमन्त्रिणः पक्षाणां दल-स्तरे च विद्यमानायाः वास्तविक-स्थितेः मध्ये महद् अन्तरं स्पष्टीभवति।

## विधायकेभ्यः मन्त्रिपदस्य प्रलोभनं दत्त्वा स्वपक्ष-सुदृढीकरणस्य आरोपः

जयराम-ठाकुरेण आक्षेपः कृतः यत् मुख्यमन्त्री स्वकीय-दलस्य प्रभारिणीम् अन्धकारे स्थापयित्वा विधायकेभ्यः मन्त्रीकरणस्य प्रलोभनं यच्छति, एतेन च स्वस्य गुटं सुदृढं विधातुं प्रयतते। सः अवदत् यत् कंञ्चित् विधायकं भीषयित्वा, कञ्चित् च मन्त्रि-पदस्य आश्वासनं दत्त्वा स्व-पक्षे रक्षितुं प्रयासः क्रियते, यस्य एकमात्रम् उद्देश्यं स्वकीय-मुख्यमन्त्रि- आसन्दस्य संरक्षणम् अस्ति।
एकस्य विधायकस्य प्रसङ्गम् उद्धृत्य विपक्ष-नेत्रा कथितं यत् प्रायः एक-वर्ष-पूर्वं मुख्यमन्त्रिणा विधानसभायां तस्मै मन्त्रि-पद-समर्पणस्य घोषणा कृता आसीत्। सः विधायकः मुख्यमन्त्रिणा सह देहली-प्रवासात् आरभ्य शिमला-मण्डी-क्षेत्राणां कार्यक्रमेषु सर्वत्र निरन्तरं दृश्यते। एतादृश्याः सान्निध्यतायाः अनन्तरमपि मन्त्रि-पद-प्राप्तेः कोऽपि निर्णयः साम्प्रतं यावत् न जातः।

### 'सर्वकारस्य कार्यकालः अपि अग्रसरः'

जयराम-ठाकुरेण प्रतिपादितं यत् सर्वकारस्य कार्यकालस्य पर्याप्तः समयः व्यतीतः अस्ति। एतादृशावस्थायां प्रश्नः उत्पद्यते यत् मन्त्रिमण्डल-विस्तारस्य प्रस्तावः कदा आगमिष्यति, मन्त्रिपद-प्रतीक्षायां स्थिताः विधायकाश्च कदा अवसरं लप्स्यन्ते। सः मुख्यमन्त्रिणः उपरि प्रदेशस्य जनतां, विधानसभां, स्वकीय-विधायक-सङ्घिनश्च भ्रान्ते स्थापयितुं गम्भीरम् आरोपं कृतवान्। विपक्ष-नेत्रा दृढतया प्रोक्तं यत् मुख्यमन्त्रिणः वक्तव्यानां काङ्ग्रेस-सङ्घटनस्य च अधिकृत-वचनानां मध्ये स्थिता संशय-स्थितिः सद्यः स्पष्टीकरणीया।

# हिमाचलस्य मण्ड्यां सम्पन्नः श्रीसत्यसाईं-सेवा-सङ्घटनस्य ऐतिहासिकः 'देवसमागमः'






**हिमसंस्कृतवार्ता मण्डी (हिमाचलप्रदेशः):** 'लघुकाशी' इति नाम्ना प्रसिद्धे मण्ड्याः ऐतिहासिके पड्डुल-क्रीडाङ्गणे श्रीसत्यसाईं-सेवा-सङ्घटनस्य (हिमाचलप्रदेशस्य) तत्त्वावधाने आयोजितः द्विदिवसीयः भव्यः 'देवसमागमः' भक्तिमय-वातावरणे श्रद्धया सोल्लासं च सम्पन्नः अभवत्। भगवतः श्रीसत्यसाईं-बाबा-महोदयस्य जन्म-शताब्दी-वर्षस्य पावनोपलक्ष्ये आयोजितेऽस्मिन् समागमे आस्थायाः, संस्कृतेः, सेवायाश्च अपूर्वः सङ्गमः दृष्टः। हिमाचलप्रदेशस्य सर्वेषु मण्डलेषु प्रायः १५२ दिनानि यावत् परिभ्रम्य आगतायाः 'श्रीसत्यसाईं-प्रेम-प्रवाहिनी-रथयात्रायाः' अस्मिन् महामहोत्सवे समग्रप्रदेशात् अष्टादश-सहस्राधिकाः (१८,०००+) भक्ताः समवेताः।

**शताधिकानां देवी-देवतानां पारम्परिक-समागमः देवध्वनयश्च**

देवभूमेः समृद्ध-देवपरम्परायाः गौरवसंरक्षणार्थं समागमेऽस्मिन् मण्डलमण्डलात् तथा च निकटवर्तिभ्यः क्षेत्रेभ्यः शताधिकाः (१००+) देवी-देवताः ससम्मानम् आमन्त्रिताः आसन्। पारम्परिक-वाद्यैः—कर्नाल-नरसिङ्ग-ढोल-नगाडादिभिः निनादितानां मङ्गलमयीनां देवध्वनीनां मध्ये देवानां भव्य-स्वागतमभवत्। पड्डुल-प्राङ्गणे देवानां प्रतिष्ठापनाय सुसज्जितः विशेष-देवमण्डपः निर्मितः आसीत्। देवानाम् अलौकिक-सान्निध्येन देवसंस्कृतेः सङ्गमेन च मण्डीनगरे अन्तर्राष्ट्रिय-शिवरात्रिमहोत्सव-सदृशः भक्तिप्रकर्षः प्रादुर्भूतः।

**भक्ति-सेवा-समन्वितानां विविधानां कार्याणाम् आयोजनम्**

समारोहस्य प्रथमे दिवसे 'श्रीसत्यसाईं-प्रेम-प्रवाहिनी-रथस्य' पारम्परिक-स्वागतम्, भव्य-शोभायात्रा, प्रशान्ति-ध्वजारोहणं, श्रीसत्यसाईं-सेवा-प्रदर्शिन्याश्च उद्घाटनं विहितम्। सन्ध्याकाले वेदमन्त्राणां सुमधुराणां भजनानां च प्रस्तुतिः अभवत्। द्वितीये दिवसे प्रभाते ओंकार-नादः, प्रभातफेरी, नगरसङ्कीर्तनं च प्राचलत्। तदनन्तरं बालकानां शोभायात्रा, बालविकासस्य छात्राणां कलाकाराणां च माध्यमेन हिमाचली-देवपरम्पराधारितानि सांस्कृतिक-दृश्यानि समुपस्थापितानि। पारम्परिक-काष्ठकुणी-शैलौ विरचितः भव्यः मञ्चः सर्वेषाम् आकर्षणस्य केन्द्रमभवत्।

**विशिष्टातिथीनां प्रेरक-सम्बोधनम्**

समारोहे प्रशान्तिनिलयात् (आन्ध्रप्रदेशात्) समागताः श्रीसत्यसाईं-सेण्ट्रल-ट्रस्टस्य प्रबन्ध-न्यासिपदमलङ्कुर्वाणाः आर. जे. रत्नाकर-वर्याः मुख्यवक्तृरूपेण उपस्थिताः। ते स्वभाषणे अवदन् यत् देवभूमेः हिमाचलस्य अस्यां पुण्यायां धरायां देवी-देवतानाम् आशीर्वादाः साईंबाबा-महोदयस्य प्रेम-सेवा-सन्देशश्च एकाकारं गताः। ते युवानः समाजसेवाम्, निःस्वार्थ-प्रेम, सदाचारं च जीवने अङ्गीकर्तुं प्रेरिताः। उत्तरक्षेत्राध्यक्षाः डॉ. सञ्जय-अग्रवाल-महोदयाः तथा च हिमाचल-सङ्घटनस्य प्रदेशाध्यक्षाः प्रो. योगेन्द्र-वर्मा-वर्याः प्रदेशे प्रचलन्तीनां सेवाप्रकल्पानां १५२ दिवसीय-रथयात्रायाश्च अनुभवान् वर्णयन्तः सर्वेषां कार्तज्ञ्यं न्यवेदयन्। दत्तस्य विवरणस्य संस्कृत-अनुवादः अधोलिखितः अस्तिः

**१२१ निर्धनाभ्यः महिलाभ्यः सीवनयन्त्राणां वितरणम्, प्राप्तम् आत्मनिर्भरतायाः सम्बलम्**

महिला-सशक्तिकरणस्य दिशि दृढं पदं प्रक्षिपद्भिः समागमस्य मञ्चात् प्रदेशस्य विभिन्नेभ्यः ग्रामीणक्षेत्रेभ्यः आगताभ्यः १२१ निर्धनाभ्यः कर्मठाभ्यश्च महिलाभ्यः निःशुल्क-सीवनयन्त्राणि प्रदत्तानि। समारोहस्य मुख्य-अतिथयः तथा च श्रीसत्यसाईं-सेण्ट्रल-ट्रस्टस्य प्रबन्ध-न्यासिपदमलङ्कुर्वाणाः आर. जे. रत्नाकर-महोदयाः लाभान्विताभ्यः यन्त्राणि समर्पितवन्तः। ते अवदन् यत् — "सत्या देवपूजा सैव या नरसेवां नारायणसेवया सह संयोजयति।" सीवनयन्त्राणि प्राप्य महिलानां मुखेषु आत्मनिर्भरतायाः सन्तोषः उल्लासश्च स्पष्टतया परिलक्षितः। अस्य उपक्रमस्य मुख्यम् उद्देश्यं ग्रामीणमहिलाभ्यः गृहस्तरे स्वरोजगारम् उपलभ्य ताः आर्थिकदृष्ट्या सुदृढाः विधातुम् अस्ति।

**आपत्प्रबन्धनस्य सेवाकार्याणां च जीवन्त-प्रदर्शनी**

पड्डुल-क्रीडाङ्गणे श्रीसत्यसाईं-सेवा-सङ्घटनेन आपत्प्रबन्धनस्य (Disaster Management) सेवाकार्याणां च आधारेण एका विशिष्टा प्रदर्शनी आयोजिता। अस्यां प्रदर्शिन्यां प्रदर्शितं यत् कथं सङ्घटनस्य 'श्रीसत्यसाईं-डिजास्टर-मैनेजमेण्ट-दलं' प्राकृतिक-आपत्सु—यथा जलप्लावे, भूस्खलने, दावानले च त्वरित-सहायतां रक्षणकार्याणि च सम्पादयति। रक्षणोपकरणानि तन्त्रज्ञानं चः प्रदर्शिन्यां संशोधन-रक्षणयोः (Search & Rescue) आधुनिकोपकरणानि, प्राथमिक-चिकित्सा-सम्पुटानि, तात्कालिक-नौकायन-तन्त्रम्, आपत्कालीन-सञ्चार-साधनानि च जीवन्तरूपेण प्रदर्शितानि।

**सेवाकार्याणां दिग्दर्शनम्:** समग्रराज्ये सञ्चालितानां निःशुल्क-चिकित्सा-शिबिराणां, चल-चिकित्सा-वाहनानां (Mobile Medical Van), नेत्रपरीक्षण-अभियानानां, स्वच्छता-अभियानानां, पर्यावरण-संरक्षण-कार्याणां च चित्राणां प्रतिरूपाणां (Models) च माध्यमेन प्रस्तुतिः कृता, या आगन्तुकैः भृशं प्रशंसिता।

**'स्थानीयाय स्वरात्मकता' (Vocal for Local): महिला-स्वयं-सहायता-समूहानां हस्तनिर्मित-उत्पादानां प्राचुर्यम्।**

समागम-परिसरे स्थानीय-महिला-स्वयं-सहायता-समूहैः (SHGs) निर्मितानां हस्तशिल्प-पारम्परिक-उत्पादानां प्रदर्शनी-विक्रय-केन्द्राणि (Stalls) विशेषम् आकर्षणकेन्द्रम् आसन्।

**पारम्परिकाः उत्पादाः:** विपणिषु हिमाचली-हस्तकलया विरचितानि उष्णांशुकानि (Shawls), पट्टू-वस्त्राणि, कुल्लवी-शिरस्त्राणानि (Caps), गलवेष्टनानि (Mufflers), करनिर्मितानि और्ण-वस्त्राणि, पारम्परिक-काष्ठ-कलाकृतयश्च प्रदर्शिताः।

**प्राकृतिकाः खाद्योत्पादाः:** महिलाभिः गृहस्तरे सज्जीकृताः पार्वत्य-जैविक-उत्पादाः—यथा सेवफल-अवलेहः (Chutney), पारम्परिक-सन्धानम् (Pickles), वन्य-ओषधीया चायः, स्थानीय-द्विदलाः (दालानि), पार्वत्य-मधु च आगन्तुकेभ्यः उपलब्धानि आसन्। अनया प्रदर्शिन्या न केवलं स्थानीय-कौशलाय मञ्चः प्रदत्तः, अपि तु भक्तजनैः प्रचुर-क्रयणं कृत्वा स्थानीय-महिला-उद्यमिनां प्रयासाः प्रोत्साहिताः।

**महाप्रसाद-वितरणेन विसर्जनेन च समापनम्**

प्रकृतेः मेघवर्षणात्परमपि भक्तानाम् उत्साहः अविरतः आसीत्। कार्यक्रमस्य परिसमाप्तिः सामूहिक-महामङ्गलारत्या, देवी-देवतानां विधिपूर्वक-विसर्जनेन, विशालेन महाप्रसाद-वितरणेन (भण्डारेण) च सञ्जाता।

# भागलपुरनगरे बिहार-इतिहास-परिषदः त्रयोदशं अधिवेशनम् आयोजितम्




**हिमसंस्कृतवार्ताः- डॉ विमलेश झा, भागलपुर** बिहारस्य ऐतिहासिक-सांस्कृतिक-वैभवं केवलं प्राचीनपंजिकासु ग्रन्थेषु च निहितानां घटनानां क्रममात्रं नास्ति। तस्य पृष्ठतः समाजः, साहित्यं, संस्कृतिः, महिलानां भूमिका, आर्थिकपरिवर्तनानि, शताब्द्याः पुरातनीपरम्परा चेत्यादीनां बहवः आयामाः सन्ति। एतेषां विविधपक्षाणां सम्यगवबोधनाय इतिहासलेखनस्य परिवर्तमानपद्धतीनां च विषये विमर्शार्थं देशस्य विभिन्नेभ्यः भागेभ्यः इतिहासकाराः, अध्यापकाः, शोधार्थिनः, विद्यार्थिनः च शनिवासरे भागलपुरे समागताः। बीएनमहाविद्यालयस्य आतिथ्ये बिहार-इतिहास- परिषदः स्वर्णजयन्ती-समारोहस्य त्रयोदशमं राष्ट्रीयाधिवेशनं भव्यतया सम्पन्नः। द्विदिवसीये अस्मिन् राष्ट्रियाधिवेशने बिहारस्य इतिहासः, इतिहासलेखनस्य विविधाः दृष्टयः, साहित्येतिहासयोः सम्बन्धः, नारीवादी- इतिहासलेखनं, बिहारस्य सांस्कृतिकपरम्परा, वर्तमानकाले कृत्रिमबुद्धिमत्तायाः भूमिका इत्यादिषु विषयेषु गम्भीरः शैक्षणिकः विमर्शः अभवत्।

अधिवेशनमिदं विशेषतया महत्त्वपूर्णमस्ति, यतः अत्र इतिहासः केवलम् अतीतस्य अध्ययनविषयरूपेण न, अपि तु वर्तमानसमाजेन भविष्यस्य शिक्षया च सम्बद्धरूपेण द्रष्टुं प्रयत्नः कृतः। अधिवेशनं सम्बोधयन्ती प्रो. चारु गुप्तामहाशया इतिहासस्य हिन्दीसाहित्यस्य च पारस्परिकसम्बन्धेषु विस्तरेण प्रकाशं न्यवेदयत्। इतिहासस्य विविधपक्षाणां सम्यक् अवगमने तेषां जनसमक्षे प्रकाशने च साहित्यस्य महत्त्वपूर्णा भूमिका वर्तते इति सा प्रतिपादितवती। उत्तरभारतस्य इतिहासस्य अवबोधने हिन्दीसाहित्यस्य योगदानं, नारीवादी- लेखनस्य महत्त्वमपि सा विशेषतया रेखांकितं कृतवती। इतिहासग्रन्थेषु उल्लिखिताभिः घटनाभिः सह साहित्ये निहितानां सामाजिकानुभवानाम् अध्ययनं कस्यचित् कालखण्डस्य अधिकव्यापकं स्वरूपं ज्ञातुं सहायकं भवतीति अधिवेशने प्रतिपादितम्। अस्मिन् सन्दर्भे इतिहासलेखनस्य विविधदृष्टिकोणानामपि गम्भीरः विचारः कृतः।

खगड़ियालोकसभाक्षेत्रस्य सांसदः राजेश वर्मामहोदयः बिहारस्य गौरवपूर्णस्य ऐतिहासिकस्य सांस्कृतिकस्य च वैभवस्य उल्लेखं कुर्वन् राज्यस्य प्रथमराष्ट्रपतित्वेन प्रसिद्धस्य डॉ. राजेन्द्रप्रसादस्य सहितं बिहारस्य गौरवशालिनीं ऐतिहासिकपरम्परां स्मृतवान्। भारतस्य सामाजिक- सांस्कृतिक- बौद्धिकविकासे बिहारस्य महत्त्वपूर्णं योगदानं वर्तते इति सः प्रतिपादितवान्। इतिहासस्य सामाजिक- आर्थिकजीवनेन निरन्तरसम्बन्धस्य विषये अपि सः स्वविचारान् प्रस्तुतवान्। ललितनारायण- मिथिला- विश्वविद्यालयस्य कुलपतिः प्रो. संजयकुमारचौधरी बिहारस्य इतिहासं गौरवपूर्णां विरासतं निरूपयन् बिहार-इतिहास-परिषदः दीर्घकालीनानां शैक्षणिकानां शोधपरकाणां च कार्याणां प्रशंसां कृतवान्।

**इतिहासविमर्शे कृत्रिमबुद्धिमत्तायाः प्रवेशः**

अधिवेशने इतिहासेन सह आधुनिकप्रौद्योगिक्याः अपि विशेषतया चर्चा अभवत्। पूर्णिया- विश्वविद्यालयस्य कुलपतिः प्रो. विवेकानन्दसिंहः इतिहासस्य दृष्ट्या पञ्चाशद्वर्षाणां कालखण्डः अत्यन्तमहत्त्वपूर्णः भवतीति प्रतिपादितवान्। वर्तमानकाले वर्धमानस्य कृत्रिमबुद्धिमत्तायाः प्रभावस्य विषये सः विस्तरेण विचारं प्रस्तुतवान्। कृत्रिमबुद्धिमत्तां शिक्षणे उपयोगिसाधनरूपेण स्वीकरणीयम्, किन्तु तां शिक्षकस्य विकल्परूपेण न स्थापनीयम् इति तेन प्रतिपादितम्। इतिहासविषये स्रोतसां परीक्षणं, सन्दर्भस्य सम्यगवबोधनं तथा घटनानां यथार्थव्याख्या महत्त्वपूर्णा भवति। अतः प्रौद्योगिक्याः वर्धमाने उपयोगेऽपि शिक्षकस्य शोधस्य च भूमिका महत्त्वपूर्णा एव इति विमर्शे प्रतिपादितम्।

**विशिष्टानि स्मृतिव्याख्यानानि**

अधिवेशनस्य प्रमुखाकर्षणेषु प्रो. रामशरणशर्मा- स्मारकव्याख्यानं प्रो. सुमितसरकार- स्मारकव्याख्यानम् आस्ताम्। दिल्ली- विश्वविद्यालयस्य प्रो. स्मिता सहगल महोदया प्रो. रामशरणशर्मणः इतिहासलेखनस्य योगदानस्य च विषये व्याख्यानं प्रस्तुतवती। रविन्द्रभारती- विश्वविद्यालयस्य प्रो. हितेन्द्रपटेलः प्रो. सुमितसरकार- स्मारकव्याख्यानं प्रस्तुतवान्। एताभ्यां व्याख्यानाभ्यां इतिहासलेखनस्य परम्परा, शोधकार्यं, तस्मिन् क्षेत्रे च महत्त्वपूर्णं योगदानं प्रकाशे आनीतम्। अधिवेशनस्य अवसरः अनेकेषां महत्त्वपूर्णानां ग्रन्थानां लोकार्पणस्य साक्षी अभवत्। बिहार-इतिहास-परिषदः क्रियाकलाप - ग्रन्थेन सह प्रो. रामलखनशुक्ल-स्मृतिग्रन्थस्य लोकार्पणं जातम्। तदतिरिक्तं डॉ. रविशङ्करकुमारचौधरी-रचितस्य मुगलहरम इति ग्रन्थस्य, प्रो. अशोक अंशुमान् इत्यादिभिः रचितस्य चम्पारणे नीलसंघर्षस्य सैनिकाः इति ग्रन्थस्य, डॉ. शम्मा अञ्जुम-रचितस्य मुगलकालीन- प्रभावशालिनीनां महिलानां राजनीतिक- सांस्कृतिकस्थितिः इति ग्रन्थस्य तथा डॉ. अंशुमानसुमन-रचितस्य आधुनिकविश्वस्य इतिहासः इति ग्रन्थस्य च लोकार्पणमपि सम्पन्नम् अभवत्। एतेषु ग्रन्थेषु इतिहासस्य विभिन्नकालखण्डानां, सामाजिकसंघर्षाणां, महिलानां भूमिकायाः, राजनीतिक- सांस्कृतिक- परिस्थितीनां विषये विविधाः शोधपरकाः विषयाः प्रस्तुताः सन्ति।

बी. एन. महाविद्यालयस्य प्रधानाचार्यः डॉ. अनिरुद्धकुमारः देशस्य विभिन्नेभ्यः भागेभ्यः समागतानां विदुषां अतिथीनां च स्वागतं कृतवान्। बिहार- इतिहासपरिषदः स्वर्णजयन्ती- अधिवेशनस्य भागलपुरे आयोजनं महाविद्यालयाय गौरवस्य विषयः इति सः उक्तवान्। तेन प्रो. संजयकुमारचौधरी इत्यस्य शैक्षणिकयोगदानमपि स्मारितम्। कार्यक्रमस्य सञ्चालनं प्रो. मनोज कुमारेण कृतम्, धन्यवादज्ञापनं परिषदः सचिवः प्रो. दयानन्दरायमहोदयेन कृतम्। सायंकाले सांस्कृतिककार्यक्रमस्य आयोजनमपि अभवत्, यस्मिन् छात्रछात्राभिः विविधेषु चलचित्रगीतिषु नृत्यप्रस्तुतयः प्रदर्शिताः। अस्मिन् अधिवेशने प्रो. अमरकान्तसिंहः, संयुक्तसचिवः प्रो. के. के. मण्डलः, संरक्षकः प्रो. विशम्भरझा, प्रो. रेणुकुमारी च सहिताः बहवः विद्वांसः उपस्थिताः आसन्। दिल्ली- विश्वविद्यालयात् प्रो. स्निग्धासिंहः, प्रो. नीरजासिंहः, डॉ. पङ्कजकुमारझा, प्रो. अशोककुमारः, डॉ. अंशुमान इत्यादयः विभिन्न- विश्वविद्यालयानां इतिहासकाराः शोधार्थिनश्च सहभागिनः अभवन्।

द्विदिवसीयमिदम् अधिवेशनं बिहारस्य इतिहासस्य सांस्कृतिकधरोहरः च विषये राष्ट्रियस्तरस्य शैक्षणिकविमर्शाय भागलपुरक्षेत्रे महत्त्वपूर्णं केन्द्रं मन्यते। इतिहासः कथं लेखनीयः, इतिहासलेखने केषां स्वराणां स्थानं भवेत् तथा कृत्रिमबुद्धिमत्तायाः युगे इतिहासस्य अध्ययन- अध्यापनयोः स्वरूपं कथं परिवर्तनीयम् इत्यादयः प्रश्नाः अपि अधिवेशनस्य विमर्शस्य प्रमुखाः विषयाः आसन्।

# किन्नौरे 'पागल-नाला' इत्यत्र विपुल- मलिनावशेषः पतितः, शिमला-रिकाङ्गपिओ- राष्ट्रिय-राजमार्गः-५ अवरुद्धः, कार-यानम् अपि निरुद्धम्



**हिमसंस्कृतवार्ताः- रिकाङ्गपिओ।**

किन्नौर-जनपदे जायमानायाः वृष्टेः मध्ये पर्वतात् अकस्मात् मलिनावशेष-शिलाखण्ड-प्रपातेन शिमला- रिकाङ्गपिओ- राष्ट्रिय- राजमार्गः-५ (NH-5) पुनः एकवारं यातायातार्थम् अवरुद्धः जातः। टापरी-क्षेत्रस्य समीपे 'पागल-नाला'-नामके स्थाने रविवासरे अपराह्ने सार्ध-द्वि-वादने (२:३०) अकस्मात् विपुलः अवकर-पङ्क-प्रवाहः मार्गे समागतः। अनेन राष्ट्रिय-राजमार्गे वाहनानाम् आवागमनं साकल्येन स्तब्धम् अभवत्।

उच्यते यत् अवकर-पातानुवेलम् एव मार्गात् गच्छत् एकं कार-यानम् अपि अस्य व्याप्तौ समागत्य पङ्के मग्नं जातम्। तथापि अस्यां दुर्घटनायां कस्यापि जनस्य हताहतस्य सूचना नास्ति। मार्ग-अवरोधेन सहैव राष्ट्रिय-राजमार्गस्य उभयतः वाहनानां दीर्घाः पङ्क्तयः सञ्जाताः।

### उभयोः दिशोः बहूनि किलोमीटर-पर्यन्तं संलग्नाः वाहनानां पङ्क्तयः

शिमलां प्रति रिकाङ्गपिओ-नगरं प्रति च गच्छन्ति वाहनानि पागल-नाला इत्यत्र उभयतः संलग्नानि सन्ति। पश्यत्सु एव पश्यत्सु वाहनानां पङ्क्तयः बहूनि किलोमीटर-पर्यन्तं विस्तृताः जाताः, येन यात्रिकाः वाहन-चालकाश्च महत्याः असुविधायाः सम्मुखीकरणं कुर्वन्ति। पागल-नाला-क्षेत्रे निरन्तरं जायमानेन अवकर-पातेन राजमार्गे स्थितिः अतीव संवेदनशीला वर्तते। एतादृशावस्थायां मार्गेण गच्छद्भिः वाहनचालकैः गम्भीरा सतर्कता रक्षणीया।

### मार्गस्य पुनः-प्रवर्तनाय संलग्ना विभागीय- यन्त्रसम्पत्तिः

राजमार्ग-अवरोधस्य सूचनां प्राप्य सम्बद्धविभागस्य यन्त्राणि स्थलम् उपसम्पन्नानि, मार्गात् अवकर-निष्कासनस्य कार्यं च त्वरितगत्या प्रारब्धम्। विभागपक्षतः मार्गं शीघ्रातिशीघ्रं यातायात-योग्यं विधातुं प्रयासाः क्रियन्ते। साम्प्रतं शिमला-रिकाङ्गपिओ- राष्ट्रमार्गे-५ पागल-नाला समीपे आवागमनं पूर्णतया स्थगितम् आसीत्; मार्गप्रवर्तनं यावत् उभयतः स्थिताः चालकाः प्रतीक्षां कर्तुं बाध्याः अभवन्।किन्नौरजनपदे वर्षाकाले पर्वतीयभागेषु भूस्खलनस्य पङ्क-प्रपातस्य च दुर्घटनाः निरन्तरं दृष्टिपथम् आगच्छन्ति। अत एव राजमार्गे यात्रां कुर्वन्तः जनाः ऋतोः मार्ग-स्थितेश्च समीक्षानन्तरम् एव यात्रां कुर्युः इति प्रशासन-पक्षतः परामर्शः दीयते।

# नेपालदेशे अतिवृष्टेः हेतोः

## गण्डकनद्याः जलप्रवाहः संवर्धितः, वाल्मीकिनगर-जलबन्धे ४.२४ लक्ष-घनपाद/ क्षण-परिमितः प्रवाहः पञ्जीकृतः

***देवघाट-जलमापकस्य आधारेण सायं यावत् पञ्चलक्ष-घनपाद/क्षण-परिमितं प्राप्तुं सम्भावना; जलसंसाधनविभागः अहोरात्रं जागरूकः***

**हिमसंस्कृतवार्ताः- राघव नाथ झा, पाटलिपुत्रम्**

नेपालदेशे गण्डकनद्याः जलग्रहणक्षेत्रे गतासु चतुर्विंशति- होरासु सञ्जातायाः प्रभूतायाः अतिवृष्टेः हेतोः गण्डकनद्याः जलप्रवाहः तीव्रगत्या प्रवर्धितः वर्तते। जलसंसाधनविभागस्यानुसारेण भानुवासरे प्रातरेकादशवादने वाल्मीकिनगर- जलबन्धे ४,२४,००० (चतुर्लक्ष- चतुर्विंशति- सहस्र-घनपाद/ क्षणपरिमितः) जलप्रवाहः पञ्जीकृतः। नेपालस्थे देवघाट-जलमापके जलस्तरस्य वृद्धिं विलोक्य सायङ्काले यावत् अयं प्रवाहः प्रायः पञ्चलक्ष-घनपाद/ क्षणपरिमितं वा ततोऽप्यधिकं सम्प्राप्तुं सम्भाव्यते। जलसंसाधनमन्त्री उपमुख्यमन्त्री च विजयकुमारचौधरी न्यवेदयत् यत् सम्भाव्यमानाम् आपत्स्थितिं समीक्ष्य विभागस्य सर्वेभ्यः मुख्याभियन्तृभ्यः, अधीक्षणाभियन्तृभ्यः, कार्यपालकाभियन्तृभ्यः, क्षेत्रीयपदाधिकारिभ्यश्च अहोरात्रं पूर्णसजगतायां स्थातुं समादिष्टम्। गण्डकनद्याः उभयोः तटबन्धयोः अतिरिक्तानाम् अभियन्तॄणां विनियोगं कृत्वा निरन्तरं प्रत्यक्षनिरीक्षणम् आरब्धमस्ति।

# भूतपूर्व-सैनिकानां कृते सुक्खू-सर्वकारस्य महद्-योगदानम्; १७.०९ कोटि-रूप्यकाणां साहाय्येन सहस्रशः कुटुम्बानां कल्याणम्



हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेश-सर्वकारेण भूतपूर्व-सैनिकानां, युद्ध-विधवानां, रक्षाकर्मिणाम् आश्रितानां, वीरता- पुरस्कार-विभूषितानां वीर-योद्धॄणां च कल्याणाय विविधानां योजनानां माध्यमेन महती वित्तीयसहायता प्रदत्ता। मुख्यमन्त्री ठाकुर- सुखविन्दरसिंहसुक्खू- महोदयः अवदत् यत् सैनिकानां तेषां परिवाराणां च संवर्धनं सर्वकारस्य प्रमुख- प्राथमिकतासु अन्तर्भवति। २०२५-२६ वित्ताब्दे विविधानां कल्याणकारिणीनां प्रवृत्तीनाम् अन्तर्गतं १७.०९ कोटिरूप्यकाणां वित्तीयसाहाय्यम् अनुदानानि च समुपलब्धानि कृतानि, येन आहत्य २,२६३ लाभान्विताः उपकृताः अभवन्।

### ९६८ लाभार्थिभ्यः ६.१३ कोटि-रूप्यकाणां वृद्धावस्था- पेंशनराशिः

वृद्धावस्था-वृत्ति-योजनायाः अन्तर्गतं ९६८ लाभान्वितेभ्यः ६.१३ कोटि-रूप्यकाणां सहायता वितरिता। एतदतिरिक्तं राज्यस्य १,०८४ वीरता-पुरस्कार- विभूषितेभ्यः तेषां शौर्यस्य अदम्य-साहसस्य च सम्मानाय ३ कोटि-रूप्यकाणि विमुक्तानि। कर्तव्यपालने हुतात्मनां, दिवङ्गतानां वा अङ्गवैकल्यं (दिव्याङ्गताम्) प्राप्तानां ५७ रक्षा-कर्मिणाम् आश्रितेभ्यः ७.६२ कोटि-रूप्यकाणां महद्- वित्तीयसाहाय्यं समर्पितम्। तत्रैव १५४ 'वार-जागीर' लाभार्थिभ्यः २०.८३ लक्ष-रूप्यकाणि, पुणे-मोहाली-स्थितयोः पक्षाघात-पुनर्वास- केन्द्रयोः कृते ६ लक्ष-रूप्यकाणां साहाय्यं प्रदत्तम्।

### सैनिकस्य वीरगतौ परिवाराय ७५००० रूप्यकाणां तत्कालिक-सहायता

सेवाकाले कस्यापि सैनिकस्य वीरगतौ सत्यां तस्य निकटतम-परिजनाय सद्यः साहाय्यरूपेण ७५,००० रूप्यकाणि प्रदीयन्ते। अनेन सहैव सैनिक-कल्याण- भवनानाम् अनुरक्षणाय ६.७४ लक्षरूप्यकाणां वित्तीयप्रावधानं विहितम्। आपद्-अवस्थायां सैनिकानां तेषां च कुटुम्बानां कृते समयबद्धरूपेण आर्थिक-सङ्कट-निवारणं साहाय्यप्रदानं च एतासां योजनानां मूलम् उद्देश्यम् अस्ति।

### सेना-नियुक्ति-प्रशिक्षणाय अपि वर्धितं साहाय्यम्

युवकान् सशस्त्रसेनासु प्रवेशाय प्रोत्साहनेन सह नियुक्ति-प्रक्रियासु अपि सर्वकारः पूर्णं सहयोगं ददाति। २०२५-२६ वित्ताब्दे काङ्गड़ा- हमीरपुर-मण्डी- शिमला- मण्डलेषु सेना-नियुक्ता-मेलानाम् आयोजनाय २.२८ कोटिरूप्यकाणि अनुमोदितानि। एतदतिरिच्य सेना-प्रवेशाय सज्जीकुर्वतां तरुणाम् उचितमार्गदर्शनाय प्रशिक्षणायाः च मण्डीजनपदस्य बरछवाड़स्थिताय मेजर- सोमनाथशर्मा- प्रशिक्षण-अकादमी-संस्थानाय २०२५-२६ वित्ताब्दे १०.२६ कोटि-रूप्यकाणि समुपलब्धानि कृतानि।

### सैनिकानां परिवाराणां च कल्याणे कृतसङ्कल्पः सर्वकारः

मुख्यमन्त्री ठाकुर-सुखविन्दरसिंहसुक्खू-महोदयः प्रोक्तवान् यत् सशस्त्रसेनानां वीराः राष्ट्रस्य प्रदेशस्य च सुरक्षायाः अखण्डतायाश्च कृते अमूल्यं योगदानं कुर्वन्ति। अतः सर्वकारः सेवारतानां सैनिकानां, भूतपूर्व-सैनिकानां, तेषां परिवाराणां च कल्याणे साकल्येन समर्पितः अस्ति। युद्ध-विधवाभ्यः, सैनिकाश्रितेभ्यः, वीरता- पुरस्कार-धारकेभ्यश्च सर्वकारीययोजनानां लाभः सुदृढरूपेण प्रापयिष्यते। हिमाचलस्य सेनापरम्परा सुदीर्घा गौरवान्विता च वर्तते; अतः सैनिक-कल्याणाय आधारभूतसंरचनासु, नियुक्तिसाहाय्ये, प्रशिक्षणव्यवस्थासु च राज्य-सर्वकारः सततं कार्यं करिष्यति।

# बालभारती- पब्लिक- विद्यालयस्य प्राङ्गणे 'संस्कृतोत्सवप्रदर्शनी ५.०' इत्याख्यस्य भव्यम् अनुष्ठानम्; शिक्षाविद्भिः कूटनीतिज्ञैश्च कृता संस्कृतस्य वैश्विकमहत्त्वस्य चर्चा





**हिमसंस्कृतवार्ताः- नव देहली।** राजधानी-देहल्यां स्थितस्य बालभारती- पब्लिक- विद्यालय- गङ्गाराम- चिकित्सालय-मार्गस्य प्राङ्गणे 25.09.2026 तमे दिनाङ्के 'संस्कृतोत्सवः- प्रदर्शनी ५.०' इति कार्यक्रमः अत्यन्तं भव्यतया गरिमामयशैल्या च सफलतापूर्वकं सम्पन्नः अभवत्। "संस्कृतिः संस्कृताश्रिता", "जयतु संस्कृतम्, जयतु भारतम्" इति ध्येयवाक्यम् आधृत्य आयोजितस्य अस्य कार्यक्रमस्य मुख्यः उद्देश्यः संस्कृतं प्रति, भारतस्य मूलाधारभूतं प्राचीनरिक्थं प्रति, स्वकीय-दैशिक-मातृ-भाषाणां संरक्षणं प्रति संस्कृत-संस्कारान् प्रति च छात्राणां समाकर्षणार्थं संस्कृतस्य अध्ययनार्थं तेषाम् अभिप्रेरणम् आसीत्। अनेन माध्यमेन भारतीय- ज्ञान- परम्परायाः आधारेण विकसितभारतस्य निर्माणे स्वस्य योगदानप्रदानमपि अस्य प्रमुखं लक्ष्यम् आसीत्। प्रातः ९:१५ वादने विद्यालय- परिसर- मागतानां मुख्यतीथीनां एन.सी.सी. कैडेट-छात्रैः औपचारिक- सैन्याभिवादनेन सह भव्यं स्वागतं कृतम्, तदनन्तरं विद्यालयस्य वाद्यवृन्देन सुमधुर- साङ्गीतिकप्रस्तुत्या अतिथयः अभिनन्दिताः। सभागारप्रवेशात् पूर्वं छात्र- छात्राभिः अतिथीनां तिलकीकरणं कृत्वा श्रीमद्भगवद्गीतायाः मन्त्रोच्चारैः सह तेषां सत्कारः विहितः। तत्पश्चात् अतिथिभिः कृतेन दीपप्रज्वलनेन तुलसीपादपारोपणेन च सह कार्यक्रमस्य औपचारिकः शुभारम्भः जातः, यत्र दशम्याः कक्षायाः छात्रैः वैदिकमङ्गलाचरणं प्रस्तुतम्। विद्यालयस्य प्रधानाचार्यैः दीपकदुआ- महोदयैः अतिथिभ्यः पादपं उत्तरीयञ्च समर्प्य तेषाम् आत्मीयमौपचारिकं च स्वागतं कृतम्। स्वकीये स्वागताध्यक्षीयोद्बोधने प्रधानाचार्यवर्यैः उक्तं यत्- "संस्कृतं न केवलं काचिद् भाषा, अपि तु भारतस्य आत्मा अस्माकं सांस्कृतिकास्मितायाः मूलाधारश्च अस्ति।" अनेनैव सह ते स्वस्य बहुमूल्यं समयं प्रदानं कृतवद्भ्यः सर्वेभ्यः अतिथिभ्यः अकैतवकार्तज्ञ्यमपि प्रकटितवन्तः। इदमत्र विशेषं ध्यानास्पदं वर्तते यद् अयं देहल्याः प्राशासनिकेतर- विद्यालयानाम् इतिहासे प्रथमः अवसरः आसीत् यत्र कश्चन उच्चस्तरीयः राजनयिकः, कूटनीतिज्ञः कस्यचित् केन्द्रीय- विश्वविद्यालयस्य कुलपतिश्च युगपदेव एकस्मिन्नेव मञ्चे उपस्थाय छात्रान् सम्बोधितवन्तौ। समारोहे प्रमुखातिथिरूपेण उपस्थिताः आयरलैण्डदेशे भारतस्य पूर्वराजदूताः, मालदीवदेशस्य प्राक्तनोच्चायुक्ताः टोरण्टो-नगरस्य पूर्वमहावाणिज्यदूताश्च श्रीअखिलेशमिश्र-महोदयाः वैश्विकमञ्चेषु संस्कृतस्य उपयोगितां परिचयं च रेखाङ्कितवन्तः। तैरुक्तं यत्- "अद्य विश्वस्मिन्नपि विश्वे समेषां जनानां गहनम् आकर्षणं संस्कृतं प्रति वर्तते वर्धते च। संस्कृतं सर्वासां भाषाणां जननी अस्ति, अस्य ज्ञानम् अन्ताराष्ट्रियपरिदृश्ये भारतस्य बौद्धिककक्षमतां सुदृढां करोति।" कार्यक्रमस्य मुख्यातिथयः, श्रीलालबहादुरशास्त्रि- केन्द्रीय- संस्कृत- विश्वविद्यालयस्य माननीयाः कुलपतयः प्रो. मुरलीमनोहरपाठक-महोदयाः छात्रान् सम्बोध्य संस्कृताध्ययनस्य व्यावहारिक- आध्यात्मिक- आयामेषु प्रकाशं प्रक्षिप्तवन्तः। ते छात्रान् संस्कृतसाहित्यस्य गूढज्ञानम् आत्मसात् कर्तुं दैनन्दिनजीवने च अस्य प्रयोगाय प्रेरितवन्तः।

अत्रैवाकाशवाणी-देहल्याः सहायकनिदेशकाः, सुप्रसिद्धाः गीतकाराः वरिष्ठाः साहित्यकाराश्च श्रीरामावतारबैरवामहोदयाः विशिष्टअतिथिरूपेण उपस्थिताः सन्तः भाषायाः वैश्विकं महत्त्वम् प्रतिपादितवन्तः। ते अत्यन्तं रोचकशैल्या छात्रान् बोधितवन्तः यत् कथं संस्कृतस्य अनुशीलनम् अस्माकं दैनन्दिनजीवनं समृद्धं करोति, चिन्तनप्रक्रियां च अनुशासितां विदधाति।

अस्य 'संस्कृतोत्सव ५.०' इत्याख्यस्य मुख्याकर्षणेषु विशाला संस्कृत-प्रदर्शनी, पत्र-पत्रिका-प्रदर्शनी, प्राचीनग्रन्थ-प्रदर्शनी, छात्रैः प्रस्तुताः मनोहराः सांस्कृतिकाः कार्यक्रमाः, विशेषतः "सामाजिक- सञ्जालम्" इति संस्कृतनाटकस्य मञ्चनं 'सौगन्धिका' इति पत्रिकायाः गरिमामयं विमोचनम् च समाविष्टम् आसीत्।

समारोहस्य समापनं राष्ट्रमङ्गलस्य कामनया, शान्तिपाठेन राष्ट्रगानेन च सह अभवत्, यत्र सर्वैः संस्कृतभाषायाः संरक्षणस्य संवर्धनस्य च दृढः सङ्कल्पः गृहीतः। उल्लेखनीयमस्ति यत् अस्याः प्रदर्शन्याः सफलायोजनं प्रधानाचार्याणां दीपकदुआ- महोदयानाम् अभिप्रेरणया, उपप्रधानाचार्याणां विनीताधवन- महोदयानां मार्गदर्शनेन मुख्याध्यापिकानां नीतानिझारामहोदयानां पथप्रदर्शने च सम्पन्नमभूत्। कार्यक्रमस्य सफलसंयोजने वरिष्ठसंस्कृतशिक्षिकायाः ज्योत्स्नाश्रीवास्तव- महोदयायाः, डॉ. युवराजभट्टराई- महोदयस्य डॉ. वीरेन्द्रकुमारशर्मा- महोदयस्य च विशेषं योगदानमासीत्।

# केन्द्रीय-संस्कृत-विश्वविद्यालयेन सहकार्येण अमृताब्दग्रन्थावल्याः अन्तर्गतं डॉ. वर्षा-टोडणगावकर-वर्यायाः 'ऋषिशतकम्' ग्रन्थद्वयस्य विमोचनम्



**नागपुरम्:** केन्द्रीय-संस्कृत-विश्वविद्यालयः, नवदेहली इत्यस्य गरिमामय- सौजन्येन संस्कृत-भाषा-प्रचारिणी-सभा, नागपुरम् इत्यनया संस्थया स्वकीयायां प्रतिष्ठित-'अमृताब्दग्रन्थावल्यां' विविध-विदुषां विदुषीणां च प्रायः पञ्चसप्ततिः (७५) महत्त्वपूर्णाः ग्रन्थाः प्रकाशिताः। एतस्यामेव ग्रन्थमालायां विदुष्याः डॉ. वर्षा-टोडणगावकर-महोदयायाः मौलिक- कृतिरूपेण विरचितयोः 'ऋषिशतकम् (भागः १)' तथा 'ऋषिशतकम् (भागः २)' इत्येतयोः उभयोः ग्रन्थयोः भव्य-विमोचनं गतदिने सोल्लासमभूत्। समारोहे वक्ताभिः प्रतिपादितं यत् एते ग्रन्थाः संस्कृत-साहित्य-संवर्धने ऋषि-परम्परायाः परिचये च मीलित-प्रस्तर-सदृशाः सिद्ध्यन्ति। संस्कृत- भाषा-प्रचारिणी-सभायाः एषः उपक्रमः संस्कृत-जगतः विदुषाम् अध्येतॄणां च कृते अनुपमः उपहारः अस्ति। कार्यक्रमे बहुसंख्याकाः संस्कृत-विद्वांसः, शोधच्छात्राः, प्रबुद्ध-नागरिकाश्च उपस्थिताः आसन्। सभायाः पदाधिकारीभिः सर्वेभ्यः सहयोगिभ्यः कार्तज्ञ्यं ज्ञापितम्।

# भागलपुर- भारतीय- सूचनाप्रौद्योगिकी- संस्थानस्य

## दीक्षान्तसमारोहः सम्पन्नः,२६२ छात्रेभ्यः उपाधयः, पञ्चभ्यः स्वर्णपदकानि





**हिमसंस्कृतवार्ताः- डॉ विमलेश झा, भागलपुरम्**
बिहारराज्यस्य भागलपुरनगरस्य भारतीय- सूचनाप्रौद्योगिकी- संस्थानस्य (ट्रिपल आईटी) तृतीयः दीक्षान्तसमारोहः शनिवासरे टाउनहॉल-सभागारे भव्यतया सम्पन्नः। समारोहस्य उद्घाटनं राज्यसभासांसदेन विनोद तावडे तथा संस्थानस्य निदेशकः प्रो. अशोक खाडे इत्यादिभिः अतिथिभिः दीपप्रज्वलनेन कृतम्। अस्मिन् समारोहे बी.टेक २०२२–२६, एम.टेक २०२४–२६, पूर्ववर्ती वर्गयोः च सम्मिल्य २६२ छात्रेभ्यः उपाधयः प्रदत्ताः। उत्कृष्टशैक्षणिकप्रदर्शनस्य कृते पञ्च छात्रेभ्यः स्वर्णपदकानि प्रदत्तानि। बी.टेक२०२२–२६ वर्गे सर्वोत्कृष्ट- शैक्षणिक- प्रदर्शनार्थम् अंकुर द्विवेदी इत्यस्मै राष्ट्रपति स्वर्णपदकं प्रदत्तम्। एम.टेक २०२४–२६ वर्गे उत्कृष्टप्रदर्शनार्थं गौरवसिंह राजपूत इत्यस्मै चेयरमैनस्वर्णपदकं प्रदत्तम्। अन्येषु उत्कृष्टछात्रेषु डायरेक्टरस्वर्णपदकम् अन्यानि च सम्मानपदकानि अपि वितरितानि।
समारोहे उपाधिप्राप्तैः छात्रैः राष्ट्रस्य, समाजस्य च हिताय स्वीयज्ञानस्य सदुपयोगं कर्तुं शपथः स्वीकृतः। छात्राः श्वेतवस्त्रधारणेन दीक्षान्तसमारोहे सहभागिनः अभवन्। अभिभावकाः, प्राध्यापकाः तथा संस्थानस्य पदाधिकारिगणः अपि समारोहस्य साक्षिणः अभवन्। मुख्यातिथिः राज्यसभासांसदः विनोद तावडे छात्रेभ्यः सम्बोधयन् अवदत् यत् आधुनिकप्रौद्योगिक्याः ज्ञानं केवलं व्यक्तिगतसफलतायै न, अपि तु समाजस्य विविधसमस्यानां समाधानाय अपि प्रयुक्तव्यं भवेत्। विशेषतः कृत्रिमबुद्धेः सदुपयोगेन नूतनसम्भावनानां सृजनं कर्तुं छात्राः प्रेरिताः। तेन छात्रान् केवलं जीविकोपार्जनस्य अन्वेषणं न कृत्वा नवाचारस्य माध्यमेन नूतनावसरान् सृजितुं प्रेरणा प्रदत्ता। बोर्ड ऑफ गवर्नर्स अध्यक्षः प्रो. अशोक खाडेमहोदयः छात्रेभ्यः निरन्तर- अध्ययनस्य महत्त्वं प्रतिपादितवान्। तेन उक्तं यत् तकनीकीज्ञानेन सह नैतिकमूल्यानां, सामाजिकदायित्वस्य तथा राष्ट्रनिर्माणस्य भावनायाः अपि विकासः आवश्यकः वर्तते।
संस्थानस्य निदेशकः प्रो. नितिन एम. गंगने संस्थानस्य विकासयात्रायाः उल्लेखं कुर्वन् अवदत् यत् वर्षे २०१७ तमे केवलं ६७ छात्रैः प्रारब्धं संस्थानम् अधुना १२००-अधिकछात्राणां शिक्षाकेन्द्ररूपेण विकसितम् अस्ति। संस्थाने अत्याधुनिकप्रयोगशालाः, शोधसुविधाः तथा नूतनप्रौद्योगिकीसम्बद्धाः अध्ययन- अनुसन्धान- अवसराः विकसिताः सन्ति। संस्थानस्य विकासस्य प्रायः ७० प्रतिशतं कार्यं सम्पन्नं जातम् शीघ्रातिशीघ्रम् अवशिष्टकार्यं पूर्णं कर्तुं प्रयासः क्रियते। समारोहे वक्तारः छात्रान् कृत्रिमबुद्धेः, नवीनप्रौद्योगिकीनाम्, अनुसन्धानस्य च सदुपयोगेन राष्ट्रस्य विकासे योगदानं दातुं प्रेरितवन्तः। ग्रामीणस्वास्थ्य, यातायातव्यवस्था, कृषिः, ऊर्जा, जलव्यवस्था इत्यादीनां क्षेत्राणां समस्यासु प्रौद्योगिकीमाध्यमेन समाधानान्वेषणस्य आवश्यकता अपि प्रतिपादिता। समारोहे उपाधिप्राप्तछात्राणां परिश्रमस्य प्रशंसा कुर्वन् संस्थानस्य पदाधिकारिभिः तेषां उज्ज्वलभविष्यस्य कामना कृता। दीक्षान्तसमारोहः छात्राणां जीवनस्य नूतनाध्यायस्य शुभारम्भरूपेण सम्पन्नः अभवत्।

## गणेशभक्तिरसेन आप्लावितं मिथिला- कलामञ्चस्य आन्तर्जालिकं सङ्गीतसमारोहः



"गायत गणपतिं जगद्वन्दनम्..."
बोकारो। अन्तर्राष्ट्रीय-मैथिली-परिषदः इकाईरूपेण मिथिला-कलामञ्चेन 'मङ्गलमूर्तेः गणेशस्य' विषयमवलम्ब्य भव्यः आन्तर्जालिकः सङ्गीतसमारोहः आयोजितः। देशस्य विभिन्नेभ्यः प्रदेशेभ्यः समागतैः कलाकारैः भक्तिगीतानां मधुराभिः प्रस्तुतिभिः श्रोतॄणां मनांसि भक्तिरसेन आप्लावितानि।
गीतकार-गायकस्य वाराणसी-निवासिनः अशोककुमारमिश्रस्य अध्यक्षतायां तथा मिथिला-कलामञ्चस्य संयोजिकायाः आसनसोल-निवासिन्याः पूनमझायाः सञ्चालनं कार्यक्रमः अभवत्। पूनमझया भगवती-वन्दनया गणेश-वन्दनया च कार्यक्रमस्य शुभारम्भः कृतः। ततः दिल्लीस्थया प्रतिभाझया, अहमदाबादस्थया रेणुमिश्रया, बोकारोनिवासिना कविना-गायकेन अरुणपाठकेन च भक्तिगीतानि प्रस्तुतानि। जमशेदपुरस्थया पूनमझया, रश्मिमिश्रया, जयपुरस्थया रेणुझया तथा वाराणसीस्थेन अशोकमिश्रेण च विविधाः गणेश-वन्दनाः प्रस्तुताः। अन्तर्राष्ट्रीय-मैथिली-परिषदः संस्थापकेन डॉ. धनाकरठाकुरेण उक्तं यत् मिथिलायां गणेशचतुर्थ्यां मुख्यतः चौरचन-पर्वणः आयोजनस्य परम्परा वर्तते, तथापि गणेशस्य पूजा सर्वप्रथमं क्रियते। डॉ. अशोकोऽविचलः उक्तवान् यत् एतादृशाः सङ्गीतसमारोहाः जनानां पारस्परिकसम्बन्धान् सुदृढान् कृत्वा मानसिकशान्तिं प्रददति।
पटना-पुस्तकमेलस्य संस्थापकेन एन. के. झामहोदयेन धन्यवादज्ञापनं कृतम्। देशस्य विभिन्नेभ्यः प्रदेशेभ्यः मैथिली-कला-सङ्गीतप्रेमिणः अस्मिन् समारोहे उत्साहपूर्वकं सहभागीभूताः।

**हिमसंस्कृतवार्ताः, ईदरधीररजः**

## वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।
मया एका विचित्रा वार्ता श्रुता। समुद्र-विज्ञानिभिः एकः वर्णहीनः श्वेतकर्कटः प्राप्तः। सः कास्परनामकः काल्पनिकः भूतः इव दृष्टः।
**काव्या-** अहो, अतीव विचित्रः सः जलचरः! मया अपि एका हास्यकरी वार्ता पठिता। देहल्यां जनैः एकं निर्वाचनं सञ्चालितम्। तत् नगरस्य स्थूलतम-कुक्कुराय कृतम्।
**नन्दिनी-** हा हा! तेन कुक्कुरेण बहु-भोजनं खादितम् इति निश्चितम्। इदानीं पुण्यपत्तनस्य विमानस्थानके एका घटना जाता। तत्र आरक्षकैः एकः वञ्चकः निगृहीतः। तस्य समीपे त्रयः भिन्नाः परिचयाः प्राप्ताः।
**काव्या-** त्रयः परिचयाः? सः महान् चौरः एव। अन्ते मया एका भयङ्करी वार्ता ज्ञाता। एकया महिलया भाटकगृहस्य आरक्षणं खण्डितम्। यतः रात्रौ गृहस्वामिना सा 'अतीव सुन्दरी' इति उक्ता। सन्देशात् तया भयम् अनुभूतम्।

# शिक्षाविदे साहित्यकाराय च डॉ. सदान-मिश्राय भावपूर्णा श्रद्धाञ्जलिः



**सरिसब-पाही (मधुबनी), हिमसंस्कृतवार्ता — राघव-नाथ-झाः**

'अयाचीनगर-युव-प्रतिष्ठानम्' इत्यस्य तत्त्वावधाने सरिसब-पाही-ग्रामस्य प्रख्यातस्य शिक्षाविदः, साहित्यकारस्य, समाजचिन्तकस्य च दिवङ्गतस्य डॉ. सदान-मिश्रस्य पावनस्मृतौ 'डॉ. सर गङ्गानाथ झा वाचनालये' एका श्रद्धाञ्जलिसभा आयोजिता।

कार्यक्रमस्य शुभारम्भः डॉ. सदान-मिश्रस्य प्रतिकृतौ पुष्पाञ्जलिं समर्प्य, द्विनिमेषं मौनम् अवलम्ब्य, तस्य दिवङ्गतायाः आत्मनः शान्तये सामूहिकप्रार्थनया सह अभवत्। उपस्थिताः वक्तारः प्रोचुः यत् डॉ. मिश्रेण शिक्षायाः, साहित्यस्य, सांस्कृतिकचेतनायाश्च क्षेत्रेषु यद् अमूल्यम् अवदानं दत्तम्, तत् समाजे चिरं प्रेरणास्रोतः स्थास्यति। तस्य व्यक्तित्वं ज्ञानस्य, विनम्राचरणस्य, लोकसेवाभावस्य च अद्भुतः सङ्गमः आसीत्।

'अयाचीनगर-युव-प्रतिष्ठानस्य' संस्थापकेन विक्की-मण्डलेन प्रतिपादितं यत् डॉ. सदान-मिश्रस्य जीवनं नवपीढ्यै आदर्शभूतं वर्तते, तस्य विचाराणां साहित्यिक-दायस्य च संरक्षणं समाजस्य सामूहिकम् उत्तरदायित्वम् अस्ति।

अस्यां श्रद्धाञ्जलिसभायां हर्षनाथझा, प्रदीपझा, रमेशठाकुरः, अभिषेकठाकुरः, रमेशचौधरी, सागरमिश्रः, विकासः इत्येतैः सह बहवः सामाजिकाः सांस्कृतिकाश्च कार्यकर्तारः पुष्पाणि समर्प्य स्वकीयां श्रद्धाञ्जलिं निवेदितवन्तः।

सभायाः पर्यन्ते सर्वे समुपस्थिताः जनाः डॉ. सदान-मिश्रस्य आदर्शानां स्वाङ्गीकारं कुर्वन्तः शिक्षायाः साहित्यस्य च सेवायै स्वसङ्कल्पं पुनरुच्चारितवन्तः।



## एषः सुडोकु इति क्रीडा अस्ति

तत्र ९ पङ्क्यः ९ स्तम्भाः सन्ति। प्रत्येकं पङ्क्तौ १ तः ९ पर्यन्तं सङ्ख्याः एकवारमेव पूरणीयाः। प्रत्येकं स्तम्भस्य विषये अपि तथैव भवति। ९ पेटिकाः सन्ति तथा च प्रत्येकं पेटिका १ तः ९ पर्यन्तं सङ्ख्याभिः एकवारमेव पूरयितुं आवश्यकम्। २ तिर्यक् अपि तथैव पूरयितुं आवश्यकम्।

# बिहारराज्यस्य षट्शताधिक-षट्सु (६०६) सर्वकारीयातुरालयेषु निःशुल्क-ईसीजी-सुविधा, ११.४३ लक्ष-परीक्षणानि संवृत्तानि

**पाटलिपुत्रम्। हिमसंस्कृतवार्ताः राघव नाथ झा**

बिहारराज्यस्य सर्वकारीयेषु स्वास्थ्यसंस्थानेषु निःशुल्क-हृत्स्पन्दन-परीक्षणानां (ईसीजी-परीक्षणानाम्) व्याप्तिः निरन्तरं प्रवर्धमाना वर्तते। स्वास्थ्यविभागस्य प्रतिवेदनानुसारम् अप्रैल-मासात् २०२५ तः षड्विंशति-सितम्बर-मासपर्यन्तं (२०२६) राज्ये एकादशलक्षाधिक-त्रिचत्वारिंशत्-सहस्रतः (११.४३ लक्षतः) अपि अधिकानि हृत्स्पन्दन-परीक्षणानि समापितानि। परीक्षणानन्तरं दश-निमेषाणाम् अन्तरेव रोगिभ्यः तान्त्रिक-विवरणसहिता परीक्षा-पत्रिका (रिपोर्ट) प्रदीयते।

साम्प्रतं मण्डलातुरालयेषु (जिला-चिकित्सालयेषु), उपमण्डलातुरालयेषु, निर्देशनातुरालयेषु (रेफरल-अस्पतालेषु), सामुदायिके प्राथमिके च स्वास्थ्यकेन्द्रेषु, नगर-प्राथमिक-स्वास्थ्यकेन्द्रेषु च आहत्य षट्शताधिक-षट्सु (६०६) सर्वकारीयातुरालयेषु एषा व्यवस्था निःशुल्कं वर्तते। अनेन ग्राम्याणां नागराणां च उभयविधानां जनानां स्वसमीपस्थे स्वास्थ्यकेन्द्रे एव हृदयरोगसंबद्धायाः प्राथमिक्याः परीक्षायाः लाभः समुपलभ्यते।प्रति-त्रैमासिकं संवर्धितं परीक्षणम्

स्वास्थ्यविभागस्य साङ्ख्यिक्यानुसारम् अप्रैल–जून २०२५ कालावधौ १५,०८६ परीक्षणानि सम्पन्नानि, यानि जुलाई–सितम्बर २०२५ अवधौ प्रवर्ध्य ५७,४४० तथा अक्टूबर–दिसम्बर २०२५ मध्ये १,४३,९४३ परिमितानि अभवन्।



जनवरी–मार्च २०२६ कालावधौ २,५७,६०५ परीक्षणानि पञ्जीकृतानि। तथैव अप्रैल–जून २०२६ मध्ये ३,११,९०३ तथा जुलाई-मासात् २६ सितम्बर २०२६ यावत् ३,५७,९२८ हृत्स्पन्दन-परीक्षणानि कृतानि।

स्वास्थ्यमन्त्रिणा श्री-निशान्तेन निवेदितं यत् निःशुल्क-हृत्स्पन्दन-सेवायाः विस्तारेण रुग्णजनेभ्यः स्थानिके स्तरे समय एव परीक्षणं चिकित्सीयपरामर्शश्च लभ्येते। सः अवदत् यत् राज्यसर्वकारस्य मुख्योद्देश्यं प्रत्येकस्मै नागरिकायापि सुलभं गुणवत्तया युक्तं च स्वास्थ्यसंरक्षणं सम्प्रापयितुम् अस्ति।

# समापनात् पूर्वं 'सरस्'-मेलायां समापतितः जनौघः, सप्तसु दिनेषु सार्ध-द्विकोटि-रूप्यकाणां विक्रयः



**हिमसंस्कृतवार्ताः राघव नाथ झा**

बिहार-'सरस्'-मेला २०२६ इदानीं स्वस्य अन्तिमचरणं प्राप्ता वर्तते। एकोनत्रिंशत्-दिनाङ्के (२९ सितम्बर-मासे) समापनात् पूर्वं भानुवासरस्य विरामदिने ज्ञानभवनपरिसरः क्रेतृभिः संकुलः जातः। हस्तशिल्पस्य, लोककला-सुसज्जितानां परिधानानां, पारम्परिक-व्यञ्जनानां च क्रयणाय दिवसपर्यन्तं जनसम्मर्दः समापतन् आसीत्।

'जीविका'-संस्थानस्यानुसारेण मेलायाः प्रथमेषु सप्तसु दिनेषु आपणिकानां विक्रयः सार्ध-द्विकोटि-रूप्यकाणि (२.५ कोटि-रूप्यकाणि) अतीत्य प्रवृद्धः, भानुवासरपर्यन्तं च त्रिलक्षाधिकाः जनाः मेलायाः प्रत्यक्षं परिदर्शनं कृतवन्तः।

लोककला-परिधानानां सर्वाधिकी याचना बावनबूटी, सिक्की, सुजनी, काथा, भरवा-कलादिभिः निर्मितानां कञ्चुकानां (कुर्तानाम्), पादत्राण-वेषाणां (सलवार-सूट-वस्त्राणाम्), अन्यानां परिधानानां च सर्वाधिकः विक्रयः अभवत्। समग्रदेशात् समागतानां शिल्पकाराणां पञ्चत्रिंशदधिक-शतम् (१३५) आपणाः प्रमुखम् आकर्षणकेन्द्रम् आसन्। अपरत्र पारम्परिक-व्यञ्जनानां सप्तदशसु खाद्य-विभागेषु भोजनाय दीर्घाः पङ्क्तयः सञ्जाताः।

## सारण-मण्डलस्य रीता-देवी संवृत्ता मेलायाः श्रेष्ठा उद्यमिनी

सारण-मण्डलस्य दिघवारा-प्रखण्डस्था रीता-देवी एकाकिनी एव लक्षरूप्यकादधिकानां परिधानानां विक्रयम् अकरोत्। 'श्याम-जीविका-स्वयं-सहायता-समूहेन' संबद्धा रीता-देवी स्वस्य सूचिकर्म-विभागस्य माध्यमेन अष्टादशभ्यः जीविका-भगिनीभ्यः वृत्तिं (रोजगारम्) प्रदत्तवती। वस्त्रखण्डानाम् अवशिष्टभागैः उपयोगिवस्तूनां निर्माणं तथा सुजनी-काथा-गुदरी-कलानाम् आधुनिकपरिधानेषु अङ्कनम् अस्याः मुख्यं वैशिष्ट्यं वर्तते।

भानुवासरे 'जीविका'-संस्थानस्य अर्न्स्ट-एण्ड-यङ्ग-संस्थायाश्च संयुक्तोपक्रमेण क्रेतृ-विक्रेतृ-संवादः अपि समायोजितः, यत्र तन्त्रज्ञैः महिला-उद्यमिनीभ्यः उत्पाद-नामकरणाय (ब्राण्डिंग), संवेष्टनाय (पैकेजिंग), बृहद्विपणिं प्रति गमनाय च मार्गदर्शकाः उपदेशाः प्रदत्ताः।

'जीविका'-प्रबन्धनेन निवेदितं यत् मेला एकोनत्रिंशत्-दिनाङ्कं यावत् प्रवर्तिष्यते, हस्तशिल्प-अनुरागिणां कृते च क्रयणाय अयम् अन्तिमः सुवर्णसरः वर्तते।